# Shri Ganesha Stuti Agnikrita

# અગ્નિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Agnikrita

File name : gaNeshastutiHagnikRRitA.itx

Category : ganesha, mudgalapurANa, stuti, dvAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 40 | 2.40. 34-48||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# અગ્નિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
અગ્નિરુવાચ ।
નમસ્તે વિઘ્નનાશાય ભક્તાનાં હિતકારક ।
નમસ્તે વિઘ્નકર્ત્રે વૈ હ્યભક્તાનાં વિનાયક ॥ ૩૪॥
નમો મૂષકવાહાય ગજવક્ત્રાય ધીમતે ।
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ॥ ૩૫॥
ચતુર્ભુજધરાયૈવ ચતુર્વર્ગપ્રદાયિને ।
એકદન્તાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૬॥
લમ્બોદરાય દેવાય ગજકર્ણાય ઢુણ્ઢયે ।
યોગશાન્તિસ્વરૂપાય યોગશાન્તિપ્રદાયિને ॥ ૩૭॥
યોગિભ્યો યોગદાત્રે ચ યોગિનાં પતયે નમઃ ।
ચરાચરમયાયૈવ પ્રણવાકૃતિધારિણે ॥ ૩૮॥
સિદ્ધિબુદ્ધિમયાયૈવ સિદ્ધિબુદ્ધિપ્રદાયક ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમો ભક્તપ્રિયાય ચ ॥ ૩૯॥
અનન્તાનન દેવેશ પ્રસીદ કરુણાનિધે ।
દાસોઽહં તે ગણાધ્યક્ષ માં પાલય વિશેષતઃ ॥ ૪૦॥
ધન્યોઽહં સર્વદેવેષુ દૃષ્ટ્વા પાદં વિનાયક ।
કૃતકૃત્યો મહાયોગી બ્રહ્મભૂતો ન સંશયઃ ॥ ૪૧॥
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા માં શાપહીનં ત્વં કુરુ દેવેન્દ્રસત્તમ ॥ ૪૨॥
તવ ભક્તિં દૃઢાં દેહિ યયા મોહો વિનશ્યતિ ।
તવ ભક્તૈઃ સહાવાસો મમાસ્તુ ગણનાયક ॥ ૪૩॥
યદા સઙ્કટસંયુક્તસ્તદા સ્મરણતસ્તવ ।
નિઃસઙ્કટોઽહમત્યન્તં ભવામિ ત્વત્પ્રસાદતઃ ॥ ૪૪॥
એવમુક્ત્વા ગણાધીશં પ્રણતો ભક્તિસંયુતઃ ।

તમુવાચ ગણાધ્યક્ષો ભક્તવત્સલભાવતઃ ॥ ૪૫॥

(ફલશ્રુતિઃ)

ગણેશ ઉવાચ ।

ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।

ભવિષ્યતિ નૃણાં ચૈવ શ‌ૃણ્વતાં પઠતાં સદા ॥ ૪૬॥

યં યં ચિન્તયસે કામં તં તં દાસ્યામિ શાશ્વતમ્ ।

ભક્તિભાવેન સન્તુષ્ટો ભૃશં સ્તોત્રેણ સંસ્થિતઃ ॥ ૪૭॥

મદીયા ભક્તિરચલા ભવિષ્યતિ સદાઽનઘ ।

સઙ્કટં સ્મરણેનૈવ મદીયેન વિનશ્યતિ ॥ ૪૮॥

ઇતિ અગ્નિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

દ્વાદશસ્તોત્રં

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૪૦ । ૨.૪૦। ૩૪-૪૮॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 40 . 2.40. 34-48..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Agnikrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*